# vairinAshanaM kAlIkavacham

# વૈરિનાશનં કાલીકવચમ્

## Document Information

Text title : kAlIkavacham vairinAshanam

File name : kAlIkavachamvairinAshanam.itx

Category : kavacha, devii, devI, dashamahAvidyA

Location : doc_devii

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : Shribrihatkavachasangraha

Latest update : February 14, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# વૈરિનાશનં કાલીકવચમ્

અથ વૈરિનાશનં કાલીકવચમ્ ।

કૈલાસ શિખરારૂઢં શઙ્કરં વરદં શિવમ્ ।
દેવી પપ્રચ્છ સર્વજ્ઞં સર્વદેવ મહેશ્વરમ્ ॥ ૧॥

શ્રીદેવ્યુવાચ
ભગવન્ દેવદેવેશ દેવાનાં ભોગદ પ્રભો ।
પ્રબ્રૂહિ મે મહાદેવ ગોપ્યમદ્યાપિ યત્ પ્રભો ॥ ૨॥

શત્રૂણાં યેન નાશઃ સ્યાદાત્મનો રક્ષણં ભવેત્ ।
પરમૈશ્વર્યમતુલં લભેદ્યેન હિ તદ્ વદ ॥ ૩॥

વક્ષ્યામિ તે મહાદેવિ સર્વધર્મવિદામ્વરે ।
અદ્ભુતં કવચં દેવ્યાઃ સર્વકામપ્રસાધકમ્ ॥ ૪॥

વિશેષતઃ શત્રુનાશં સર્વરક્ષાકરં નૃણામ્ ।
સર્વારિષ્ટપ્રશમનંઅભિચારવિનાશનમ્ ॥ ૫॥

સુખદં ભોગદં ચૈવ વશીકરણમુત્તમમ્ ।
શત્રુસઙ્ઘાઃ ક્ષયં યાન્તિ ભવન્તિ વ્યાધિપીડિતાઃ ।
દુઃખિનો જ્વરિણશ્ચૈવ સ્વાનિષ્ટપતિતાસ્તથા ॥ ૬॥

વિનિયોગઃ
ૐ અસ્ય શ્રીકાલિકાકવચસ્ય ભૈરવઋષયે નમઃ, શિરસિ ।
ગાયત્રી છન્દસે નમઃ, મુખે । શ્રીકાલિકાદેવતાયૈ નમઃ, હૃદિ ।
હ્રીં બીજાય નમઃ, ગુહ્યે । હૂઁ શક્તયે નમઃ, પાદયોઃ ।
ક્લીં કીલકાય નમઃ, સર્વાઙ્ગે ।
શત્રુસઙ્ઘનાશનાર્થે પાઠે વિનિયોગઃ ।
ઇતિ વિન્યસ્ય ક્રાં ક્રીં ક્રૂં ક્રૈં ક્રૌં ક્રઃ ।
ઇતિ કરષડઙ્ગન્યાસાદિકં કુર્યાત્ ।

ધ્યાનમ્
ધ્યાયેત્ કાલીં મહામાયાં ત્રિનેત્રાં બહુરૂપિણીમ્ ।
ચતુર્ભુજાં લલજ્જિહ્વાં પૂર્ણચન્દ્રનિભાનનામ્ ॥ ૭॥

નીલોત્પલદલશ્યામાં શત્રુસઙ્ઘવિદારિણીમ્ ।
નરમુણ્ડં તથા ખડ્ગં કમલં વરદં તથા ॥ ૮॥

વિભ્રાણાં રક્તવદનાં દંષ્ટ્રાલીં ઘોરરૂપિણીમ્ ।
અટ્ટાટ્ટહાસનિરતાં સર્વદા ચ દિગમ્બરામ્ ॥ ૯॥

શવાસનસ્થિતાં દેવીં મુણ્ડમાલાવિભૂષણામ્ ।
ઇતિ ધ્યાત્વા મહાદેવીં તતસ્તુ કવચં પઠેત્ ॥ ૧૦॥

કાલિકા ઘોરરૂપાદ્યા સર્વકામફલપ્રદા ।
સર્વદેવસ્તુતા દેવી શત્રુનાશં કરોતુ મે ॥૧૧॥

ૐ હ્રીં સ્વરૂપિણીં ચૈવ હ્રાઁ હ્રીં હ્રૂઁ રૂપિણી તથા ।
હ્રાઁ હ્રીં હ્રૈં હ્રૌં સ્વરૂપા ચ સદા શત્રૂન્ પ્રણશ્યતુ ॥ ૧૨॥

શ્રીં હ્રીં ઐં રૂપિણી દેવી ભવબન્ધવિમોચિની ।
હ્રીં સકલાં હ્રીં રિપુશ્ચ સા હન્તુ સર્વદા મમ ॥ ૧૩॥

યથા શુમ્ભો હતો દૈત્યો નિશુમ્ભશ્ચ મહાસુરઃ ।
વૈરિનાશાય વન્દે તાં કાલિકાં શઙ્કરપ્રિયામ્ ॥ ૧૪॥

બ્રાહ્મી શૈવી વૈષ્ણવી ચ વારાહી નારસિંહિકા ।
કૌમાર્યૈન્દ્રી ચ ચામુણ્ડા ખાદન્તુ મમ વિદ્વિષઃ ॥ ૧૫॥

સુરેશ્વરી ઘોરરૂપા ચણ્ડમુણ્ડવિનાશિની ।
મુણ્ડમાલા ધૃતાઙ્ગી ચ સર્વતઃ પાતુ મા સદા ॥ ૧૬॥

અથ મન્ત્રઃ - હ્રાં હ્રીં કાલિકે ઘોરદંષ્ટ્રે ચ રુધિરપ્રિયે ।
રૂધિરાપૂર્ણવક્ત્રે ચ રૂધિરેણાવૃતસ્તનિ ॥ ૧૭॥

મમ સર્વશત્રૂન્ ખાદય ખાદય હિંસ હિંસ મારય મારય ભિન્ધિ ભિન્ધિ
છિન્ધિ છિન્ધિ ઉચ્ચાટય ઉચ્ચાટય વિદ્રાવય વિદ્રાવય શોષય શોષય
સ્વાહા ।
હ્રાં હ્રીં કાલિકાયૈ મદીયશત્રૂન્ સમર્પય સ્વાહા ।
ૐ જય જય કિરિ કિરિ કિટ કિટ મર્દ મર્દ મોહય મોહય હર હર મમ

રિપૂન્ ધ્વંસય ધ્વંસય ભક્ષય ભક્ષય ત્રોટય ત્રોટય યાતુધાનાન્
ચામુણ્ડે સર્વજનાન્ રાજપુરુષાન્ સ્ત્રિયો મમ વશ્યાઃ કુરુ કુરુ અશ્વાન્ ગજાન્
દિવ્યકામિનીઃ પુત્રાન્ રાજશ્રિયં દેહિ દેહિ તનુ તનુ ધાન્યં ધનં યક્ષં
ક્ષાં ક્ષૂં ક્ષૈં ક્ષૌં ક્ષં ક્ષઃ સ્વાહા । ઇતિ મન્ત્રઃ ।

ફલશ્રુતિઃ
ઇત્યેતત્ કવચં પુણ્યં કથિતં શમ્ભુના પુરા ।
યે પઠન્તિ સદા તેષાં ધ્રુવં નશ્યન્તિ વૈરિણઃ ॥ ૧૮॥

વૈરિણઃ પ્રલયં યાન્તિ વ્યાધિતાશ્ચ ભવન્તિ હિ ।
બલહીનાઃ પુત્રહીનાઃ શત્રુવસ્તસ્ય સર્વદા ॥ ૧૯॥

સહસ્રપઠનાત્ સિદ્ધિઃ કવચસ્ય ભવેત્તથા ।
તતઃ કાર્યાણિ સિધ્યન્તિ યથાશઙ્કરભાષિતમ્ ॥ ૨૦॥

શ્મશાનાઙ્ગારમાદાય ચૂર્ણં કૃત્વા પ્રયત્નતઃ ।
પાદોદકેન પિષ્ટા ચ લિખેલ્લોહશલાકયા ॥ ૨૧॥

ભૂમૌ શત્રૂન્ હીનરૂપાનુત્તરાશિરસસ્તથા ।
હસ્તં દત્ત્વા તુ હૃદયે કવચં તુ સ્વયં પઠેત્ ॥ ૨૨॥

પ્રાણપ્રતિષ્ઠાં કૃત્વા વૈ તથા મન્ત્રેણ મન્ત્રવિત્ ।
હન્યાદસ્ત્રપ્રહારેણ શત્રો ગચ્છ યમક્ષયમ્ ॥ ૨૩॥

જ્વલદઙ્ગારલેપેન ભવન્તિ જ્વરિતા ભૃશમ્ ।
પ્રોઞ્ક્ષયેદ્વામપાદેન દરિદ્રો ભવતિ ધ્રુવમ્ ॥ ૨૪॥

વૈરિનાશકરં પ્રોક્તં કવચં વશ્યકારકમ્ ।
પરમૈશ્વર્યદં ચૈવ પુત્ર પૌત્રાદિ વૃદ્ધિદમ્ ॥ ૨૫॥

પ્રભાતસમયે ચૈવ પૂજાકાલે પ્રયત્નતઃ ।
સાયઙ્કાલે તથા પાઠાત્ સર્વસિદ્ધિર્ભવેદ્ ધ્રુવમ્ ॥ ૨૬॥

શત્રુરુચ્ચાટનં યાતિ દેશાદ્ વા વિચ્યુતો ભવેત્ ।
પશ્ચાત્ કિઙ્કરતામેતિ સત્યં સત્યં ન સંશયઃ ॥ ૨૭॥

શત્રુનાશકરં દેવિ સર્વસમ્પત્કરં શુભમ્ ।
સર્વદેવસ્તુતે દેવિ કાલિકે ત્વાં નમામ્યહમ્ ॥ ૨૮॥

ઇતિ વૈરિનાશનં કાલીકવચં સમ્પૂર્ણમ્ ।

Encoded and proofread by Nat Natarajan nat.natarajan at gmail.com, NA

*vairinAshanaM kAlIkavacham*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*